# shrI rAmachandrAShTakam

# શ્રી રામચન્દ્રાષ્ટકમ્

## Document Information

Text title : Ramachandra Ashtakam 3

File name : rAmachandrAShTakam3.itx

Category : raama, aShTaka

Location : doc_raama

Author : E. G. Janarddanan Potti

Transliterated by : Mohan Chettoor

Proofread by : Mohan Chettoor

Acknowledge-Permission: I. G. Janarddanan Potti

Latest update : November 19, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 20, 2022

*sanskritdocuments.org*

shrI rAmachandrAShTakam

# શ્રી રામચન્દ્રાષ્ટકમ્

શ્રીરામચન્દ્ર ભગવન્ કરુણામ્બુરાશે
  શ્રીરાઘવેન્દ્ર પરિપાવનચારુમૂર્તે ।
મારોપમાઙ્ગ શરણપ્રદ રાવણારે
  સંરક્ષ માં શુભદ માન્યમતે મહાત્મન્ ॥ ૧॥

સીતાપતે દશરથાત્મજ ધર્મસિન્ધો
  દીપ્તાકૃતે પરશુરામમદાન્ત્યહેતો ।
વાતાત્મજાદિ કપિવીર સુપૂજ્યમૂર્તે
  પ્રીત્યા પ્રસીદ કુશલવપ્રિયતાત વત્સી ॥ ૨॥

ભાગ્યપ્રદં ભરતસોદરમપ્રમેયં
  સુગ્રીવસખ્યમજિતં કનકામ્બરાઢ્યમ્ ।
ભર્ગેન્દુનેત્રમતિમોહનદિવ્યરૂપં
  ત્યાગોજ્જ્વલં ભજ દિવાકરવંશરત્નમ્ ॥ ૩॥

તારેશબિમ્બવદનં સરસીરુહાક્ષં
  તારેશમોક્ષદમુદારમતિં સુભદ્રમ્ ।
મારીચદાનવહરં સજલાભ્રવર્ણં
  વીર્યામ્બુધિં ભયહરં કલયામિ રામમ્ ॥ ૪॥

ક્ષત્રિયવંશતિલકામ્બુજનાભ જેતા
  શત્રુઘ્નસોદર વિભો મહનીયકીર્તે ।
ધાત્રીપતે શિવદ પાલય સર્વથા માં
  રાત્રિઞ્ચરપ્રશમનાશ્રિતકલ્પશાખી ॥ ૫॥

ભૂમીસુતાહૃદયપઙ્કજવાસમાર્યં
  ભૂમીસુરાલિવિનુતં રઘુવંશદીપમ્ ।
સૌમ્યં પ્રસિદ્ધચરિતં પરિશોભિતાઙ્ગં
  સુસ્મેરવક્ત્રકમલં કલયે ધરેશમ્ ॥ ૬॥

મોદપ્રદં સુકૃતવારિનિધિં પ્રસન્નં
    શ્રીદાયકં શુભકરં મુનિવૃન્દવન્દ્યમ્ ।
હૃદ્યં વિભીષણનુતં કરુણાર્દ્રનેત્રં
    પાદારવિન્દયુગલં તવ નૌમિ રામમ્ ॥ ૭॥

ભૂપાલ શૈવધનુખણ્ડન તાટકારે
    સમ્પૂજ્યપન્નગધરપ્રિય દેહિ ભક્તિમ્ ।
ચાપાસ્ત્રહસ્તમહિતાશય દિવ્યમૂર્તે
    માં પાહિ ભાસુર સદા કુરુ મઙ્ગલં મે! ॥ ૮॥

શ્રીરામચન્દ્રાય નમઃ ।

ઇતિ ડૉ ઇ.જિ. જનાર્દ્દનન્ પોટ્ટિવિરચિતં
    શ્રીરામચન્દ્રાષ્ટકં સમ્પૂર્ણમ્ ।

Composed by E. G. Janarddanan Potti

*shrI rAmachandrAShTakam*

pdf was typeset on November 20, 2022

Please send corrections to *sanskrit@cheerful.com*